CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

...पद्धतिः शंकरकृत... [illegible]

शा० क० । व्राय

सन्यासपद्धति २६

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

…मनन: अथ संन्यासपद्धति प्रथमं गृहे मातृ पितृ भ्रातृ भगिनि भार्या पुत्रान् प्रार्थयेत् हे सर्वे परिवाराः
…संन्यासं करोमीत्याज्ञां प्रार्थयेत् तदनंतरं आत्मगृहे ग्रामादि प्रदक्षिणां कृत्वा तदनंतरं क्रोशप्रमाणमुत्तर
दिशं गत्वा तत्र स्नानं कृत्वा देवार्चनादिकं कृत्वा देवपितृ आदि स्मरणं कृत्वा पुनः गुरुं पश्येत् शांतं सुशीलं सुवेषं
…कुलोत्पन्नं सर्वविद्यापारंगतं देहादि अहंकाररहितं लोभमोहादि षडूर्मिरहितं शोकमोहजरामृत्युक्षुत्पिपा
साः इति षडूर्मयः शीतातपौ शरीरस्य लोभमोहौ च चेतसः प्राणस्य क्षुत्पिपासे च षडूर्मिरहितः शिवः आत्मदर्शनं ब्र
…ज्ञानपरायणं। सम्यक् शुद्धचित्तमेवं गुरुं पश्येत् यथोक्तं विधिं गुरुस्थाने गत्वा दंडवत्प्रणामं कृत्वा संन्या
सं याचेत् हे गुरो त्वं ब्रह्मा विष्णु रुद्र स्वरूपः त्वत्प्रसादात् संन्यासं करिष्यामि। पुनर्गुरुर्वदति हे पुत्र संन्यासे
…मनः कथं करिष्यसि गृहाश्रम एव कर्त्तव्यः गृहाश्रमे सर्वे धर्म्मा आप्नोषि। पुनः शिष्यो वदति। गृहाश्रमं न करोमि राम
गृहाश्रमे अनेक शोक मोहादिकं रोगाणि संपन्नानि भवंति। तस्माद् गृहाश्रमो न कर्त्तव्यः त्वच्चरणप्रसादेन श्रीहरि १

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स्मरणं करिष्यामि। पुनः गुरुर्वदति। हे पुत्र संन्यासे महादुःखं। तस्मात्संन्यासो न कर्त्तव्यः पुनः शिष्यो वदति।
हे गुरो त्वच्चरणप्रसादेन सर्वकष्टं नासयामि। हे गुरो विष्णुस्वरूपिणा त्वया प्रसादः कर्त्तव्यः पुनः गुरुर्वदति
हे पुत्र आचार्यस्थाने गच्छ। आचार्यस्थाने गत्वा दंडवत्प्रणामं कृत्वा शिष्यो वदति हे गुरो त्वदाज्ञया संन्या
करोमि पुनराचार्ये प्रोक्तं हे पुत्र केन दुःखेन संन्यासं करोषि शिष्यो वदति हे आचार्य दुःखं नास्ति मे मोक्षार्थं त्व
त्कृपया संन्यासाश्रमे हरिभजनं करोमि पुनराचार्यो रिष्यं दद्यात् ॐ ह्रीं श्रीं ब्रह्म सोहं सोहमस्मि परमहंसः
तत्वमसि शब्दां इति हंसदीक्षा हंसा एकदंडिनः शिखाबर्जुपवीत धराशिक्यक मंडलु पाणयः ग्रामैकरात्र
वासिनः कृच्छ्रचान्द्रायणपराः इति आश्रमोपनिषद् दंडकमंडलुकर मध्ये दीयते बद्रिकाश्रमादिगमनं च भवति भि
क्षां देहि हे पुत्र तीर्थयात्रां कुरु शिष्यो वदति तीर्थयात्रां करिष्यामि तीर्थयात्रां कृत्वा पुनर्गुरुस्थाने आगत्य संन्या
संपादयेत् तत्वे तानपः श्रेष्ठ निष्कलंकः निर्लोभः प्रभवाक्यं च वक्तव्यं पुनर्गुरुर्वदति हे पुत्र आचार्यसमीपे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सं॰ न्या॰ गच्छ पुनराचार्यसमीपं गत्वा दंडवत्प्रणामं कृत्वा संन्यासं प्रार्थयेत् पुनराचार्यो वदति हे पुत्र सम्यक् शुद्धचित्तस्त्व
२ धान्नोभव इति संन्यासप्रार्थनाविधिसंपूर्णं॥ गुरुशिष्यविचारात्कल्याणं प्राप्नोति अथ पद्धतिः आदौ वेदांताचार्यो
ब्रह्मा द्वितीयाचार्यो विष्णुः तृतीयाचार्यो रुद्रः चतुर्थाचार्यो वशिष्ठः पंचमाचार्यः शक्तिः षष्ठाचार्यः पराशरः सप्तमाचा
र्यो व्यासः अष्टमाचार्यः शुकः नवमाचार्यो गौडः दशमाचार्यो गोविंदः एकादशः श्रीशंकराचार्यः सत्ययुगमध्ये आचार्य
त्रयं ब्रह्मा विष्णु रुद्राः त्रेतायुगमध्ये आचार्यत्रयं वसिष्ठशक्तिपराशराः द्वापरे आचार्यद्वयं व्यासशुकौ कलियुगे आचा
र्यत्रयं गौडगोविंदशंकराचार्याः शंकराचार्यस्य चत्वारः शिष्याः स्वरूपाचार्यः पद्माचार्यः तोटकाचार्यः पृथ्वीध
राचार्यः इति अथ दशनामानि स्वरूपाचार्यस्य शिष्यद्वयं तीर्थ आश्रमश्चेति पद्माचार्यस्य शिष्यद्वितीयं वनारण्य
स्वे ति तोटकाचार्यस्य शिष्यतृतीयं गिरिपर्वतसागराः इति पृथ्वीधराचार्यस्य शिष्यत्रितीयं सरस्वती भारती पु
री चेति इति दशनामानः संन्यासिनः हरिब्रह्माशिववसिष्ठशक्तिश्चैव पाराशरः व्यासशुकगौडसहितो गोविंदश्चैव
शंकरः तीर्थाश्रमवनारण्यगिरिपर्वतसागराः सरस्वती भारती च पूरी दश विधिस्मृताः इति दश नाम संज्ञा। अथमे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पश्चिमाम्नाये शारदामठ उच्यते कीटवारसंप्रदायस्तस्य तीर्थाश्रमपदे १ द्वारकाख्यं तु क्षेत्रं स्याद्देवः सिद्धेश्वरो
भवेत् भद्रकाली तु देवी स्यादाचार्यो विश्वरूपकः २ गोमतितीर्थममलं ब्रह्मचारी स्वरूपकः सामवेदस्य वक्ता च
तत्र धर्मं समाचरेत् ३ द्वितीये पूर्वाम्नाये गोवर्द्धनमठः स्मृतः भोगवारः संप्रदायो वनारण्यपदे ततः ३ पुरुषोत्तमाख्यं
क्षेत्रं जगन्नाथोस्य देवता विमलाख्या तु देवी स्यादाचार्यः पादपद्मकः ४ तीर्थं महोदधिः प्रोक्तं ब्रह्मचारि प्रकाशकः
ऋग्वेदस्य वेदस्तत्र धर्मं समाचरेत् ५ तृतीये तूत्तराम्नाये ज्योतिष्यस्तु मठो भवेत् आनंदवारो विज्ञेयः संप्रदायो
स्य सिद्धिकृत् ६ पदानि तस्य ख्यातानि गिरिपर्वतसागराः बद्रीकाश्रमं क्षेत्रं स्यात् नारायणोस्य देवता ७ देवी पुण्या
गिरिज्ञेया तोटकाचार्य उच्यते तीर्थमलकनंदाख्यं नंदाख्यो ब्रह्मचारी तत् ८ तस्य वेदोप्यथर्वाख्यस्तत्र धर्मं समाचरेत्
चतुर्थे दक्षिणाम्नाये शृंगेरी तु मठः स्मृतः ९ भूरिवारो ह्वयस्तस्य संप्रदायो महोत्तमः पदानि त्रीणि ख्यातानि सरस्वती भा
रती पुरी १० रामेश्वराह्वयं क्षेत्रमादिवाराहदेवता। कामाख्या तस्य देवी स्यात्सर्वकामफलप्रदा ११ पृथ्वीधराह्वयाचार्यस्तु

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गभद्रेति तीर्थकं । चैतन्याख्यो ब्रह्मचारी यजुर्वेदस्य पाठकः १२ उक्ताश्चत्वार आम्नायः यतीनां तु पृथक् पृथक् अथोर्ध्वे
षं गौराणा येन ते पि ज्ञानेन सिद्धिदाः १३ पंचमेतदूर्ध्वाम्नाये सुमेरुमठ उत्तमः संप्रदायोस्य काशीस्या॰देज्ञानाभिधं स्मृतं १४ कै
लाश क्षेत्रमित्युक्तं देवतास्य निरंजनं । देवी मायातथाचार्य ईश्वरः परिकीर्तितः १५ तीर्थ मानसरः प्रोक्तं त्रैलोक्ये कारणाम
हत् तत्र संहारमार्गेण संन्यासमहमाश्रये १६ षष्ठे त्वात्मनिचाम्नाये परमात्ममठो महान् सत्संगोस्य संप्रदायः पदं योग
मनुस्मरेत् १७ नभः सरोवरं क्षेत्रं परमहंसो देवता देवी स्यान्मानसी मायाप्याचार्यश्चेतनाह्वयः १८ त्रिकुटी तीर्थमु
त्कृष्टं सर्वपुण्यप्रदायकं भवपाशविनाशाय संन्यासं तत्र चाश्रयेत् १९ सप्तमे निष्कलाम्नाये सहस्रारकजं मठः संप्रदा
यो नतत्त्वश्रीगुरोः पादुकापदे २० तत्रानुभवक्षेत्रं स्याद्विश्वरूपोस्य देवता । देवी चैतन्यशक्तिः स्यादाचार्यः सद्गुरु
स्तुतः २१ सच्छास्त्रश्रवणं तीर्थं जन्मोत्पत्तिविनाशकं पूर्णानंदक्रमेणैव संन्यासं तत्र चाश्रयेत् २२ पूर्वाचार्यकृता चेयं
सप्ताम्नायप्रणालिका । सप्ताम्नायांस्तु यो वेत्ति स योगी पूर्ण उच्यते २३ इति श्रीशंकराचार्यविरचितं सप्ताम्नायपत्रमासा ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तीर्थाश्रमवनारण्यगिरिपर्वतसागराः सरस्वती भारती च पुरी नामानि वै दशाः १ श्री पातो वैष्णवो भिक्षुः संन्या
सी पंचमाश्रमः परिव्राट सर्वतीर्थश्च सर्ववित्कामधुक सुरवी २ त्रिवेणी संगमे तीर्थे तत्वमस्यादिलक्षणे स्नायात
त्वार्थभावेन यस्तीर्थ नामा स उच्यते ३ आश्रमग्रहणे प्रौढ आशापाश विवर्जितः यातायात विनिर्मुक्त एतदाश्रम
लक्षणं ४ सुरम्ये निर्जने स्थाने वने वासं करोति यः आशाबंध विनिर्मुक्तो वननामा स उच्यते ५ अरण्ये सुस्थिरे
नित्यं आनंदनंदने वने त्यक्त्वा सर्वमिदं विश्वं आरण्य नामा स उच्यते ६ वासो गिरिवरे नित्यं गीताध्ययनतत्परः गंभीरा
चलं बुद्धिश्च गिरिनामा स उच्यते ७ वसेत्पर्वतमूलेषु प्रौढापदान धारणा सारासारं विजानाति पर्वतः परिकीर्ति
तः ८ वसेत्सागरगंभीरो ज्ञानरत्नपरिग्रहः मर्यादाये नो लंघ्येत सागरः परिकीर्तितः ९ स्वरज्ञानरतो नित्यं स्वर
वादी कवीश्वरः संसारसागरे सारः सोभिधानः सरस्वती १० विद्याभारेण संपूर्णः सर्वभारं परित्यज्येत् दुःखभारं
न जानाति भारती परिकीर्तितः ११ ज्ञानतत्वेन संपूर्णः पूर्णतत्वपदे स्थितः परब्रह्मरतो नित्यं पुरिनामा स कीर्तितः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

१२ इतिश्रीमच्छंकराचार्यविरचितंदग्धनामाभिधानंसंपूर्णं॥ अथतर्पणं। अथश्राद्धवीर्जाहोमद्विरखाय
ज्ञोपवीतत्यागविधिः अथ ब्रह्मयज्ञ प्रथमस्नानंकृत्वा उदकग्रहणमादाय आचमनंप्राणायाममन्त्रयं काल
ज्ञानेपरमेश्वरप्रीत्यर्थं ब्रह्मयज्ञमहंकरिष्ये ॐ कारस्य ब्रह्माऋषिः गायत्रीछंदः परमात्मादेवताब्रह्मयज्ञे
विनियोगः भूरादिमहाव्याहृतीनां प्रजापतिर्ऋषिः गायत्र्युष्णिगनुष्टुप्छंदांसि अग्निर्वायुः सूर्योदेवताब्रह्म
यज्ञे विनियोगः ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही धियोयोनः प्रचोदयात् इतिजपेत् आ
चमनं इति ब्रह्मयज्ञः अथ रामतर्पणं विष्णुर्विष्णुर्विष्णुरच्युतस्मरणं संध्यावंदनंकृत्वा। ततः सव्येन। ॐ यज्ञो
पवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रतिमुंचशुभ्रं यज्ञोपवीतंबलमस्तुतेजः १०
दक्षिणबाहुमु त्यकंठेआरोपयेत् पश्चात् आचार्यस्तु शिष्यहस्ते जलंदद्यात् संकल्पंकारयेत् अद्यश्रीब्रह्म
णो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरे अष्टाविंशतितमेयुगे कलियुगे कलिप्रथमचरणेजंबू

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

द्वीपे भारत खंडे आर्यावर्त्तांतर्गत ब्रह्मावर्तैकदेशे अमुकक्षेत्रे अमुक संवत्सरे अमुकायन गते श्रीसूर्ये अमुक
मासे अमुक पक्षे अमुक तिथौ अमुक वासरे अमुक नक्षत्रे अमुक योगे अमुक करणे अमुक गोत्रे अमुक नामो
हं साम तर्पणं पितृ तर्पणमहं करिष्ये इति संकल्पः आब्रह्म भुवनाल्लोका देवर्षिमुनिमानवाः तृप्यंतु पितरस्स
र्वे मातृ मातामहादयः अतीत कुलकोटीनां सप्तद्वीपनिवासिनाम् मयादत्तेन तोयेन तृप्यंतु भुवनत्रयम्
इति साम तर्पणं अथ तर्पण प्रयोगः विश्वेदेवास इत्यस्य प्रजापतिर्ऋषिः गायत्री छंदः विश्वेदेवा देवता आ
वाहने विनियोगः आवाहनं विश्वेदेवास आगत शृणुतेम हवं एदं बर्हिर्निषीदत विश्वेदेवाः शृणुतेमं हवं मे ये अंतरिक्षे य उप द्यवि ष्ठ ये अग्निजिह्वा
उत वा यजत्राः आसद्यास्मिन् बर्हिषि मादयध्वम् आगच्छंतु महाभागा विश्वेदेवा महाबलाः तर्पणे विहिता ये च
सावधाना भवंतु मे कुशूले स्थितो ब्रह्मा कुशमध्ये जनार्दनः कुशाग्रे शंकरं विद्यात् त्रयो देवा व्यवस्थिताः ॐ ब्रह्मा
ऽऽनमः ॐ ब्रह्मा तृप्यतां ॐ विष्णुस्तृप्यतां ॐ रुद्रस्तृप्यतां ॐ प्रजापतिस्तृप्यतां ॐ देवास्तृप्यतां ॐ छंदांसि तृप्यतां ॐ वे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

 दास्तृप्यतां ॐ गायत्री तृप्यतां ॐ ऋषयस्तृप्यतां ॐ पुराणानि तृप्यतां ॐ आचार्यास्तृप्यतां ॐ गंधर्वास्तृप्यतां
ॐ इतराचार्यास्तृप्यतां ॐ संवत्सरः सावयवास्तृप्यतां ॐ देव्यस्तृप्यतां ॐ अप्सरास्तृप्यतां ॐ देवानुगास्तृप्य
तां ॐ नागास्तृप्यतां ॐ सागरास्तृप्यतां ॐ पर्वतास्तृप्यतां ॐ सरितस्तृप्यतां ॐ मनुष्यास्तृप्यतां ॐ यक्षास्तृप्यतां
ॐ राक्षसास्तृप्यतां ॐ पिसाचास्तृप्यतां ॐ सुपर्णास्तृप्यतां ॐ भूतानि तृप्यतां ॐ पशवस्तृप्यतां ॐ वनस्पतयस्तृ
प्यतां ॐ औषधयस्तृप्यतां ॐ भूतग्रामश्चतुर्विधस्तृप्यतां ॐ यमस्तृप्यतां ॐ धर्मराजाय नमः मृत्युः अंतकः वैव
स्वतः कालः सर्वभूतक्षयः ॐ औदुंबरः निलः दध्ना परमेष्ठिः वृकोदरः चित्रगुप्तस्तृप्यतां ॐ कंठोपवीती ॐ सनका
दयः ऋषयः तृप्यतां तृप्यतां आसुरिः तृप्यतां कपिलस्तृप्यतां तृप्यतां ॐ वोढः ॐ पंचशिखः दक्षिणाभिमुखो यम
ऽपसव्येन वामजानुनिपातनं ॐ कव्यवाडनलः स्वधा नमः तृप्यतां ॐ सोमः ॐ अर्यमा ॐ अग्निष्वात्ताः पितरः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तृप्यतां ३ ॐ सोमपा बर्हिषदः तृप्यतां ३ ॐ अमुकगोत्र आत्मगोत्रः मातुलः पितृभगिनी मातृभगिनी आत्मभगि-
नी तथा श्वशुरो गुरुः इति सप्त गोत्राणि समीपत्र प्रमाणेन पिंडं घाङ्क्याग्निरे उद्धरेत् सप्तगोत्राणि कुलमेकोत्तरं शतं
अस्मत्पिता अमुकस्वामी तृप्यतां ३ इदं जलं तस्मै स्वधा नमः एवं त्रयः द्वितीयगोत्रं अमुकशर्मा तृप्यतां ३ इदं
जलं तस्मै स्वधा नमः इति द्वादश उदीरतामंगिरसो न इति तिसृणां शंखः प्रजापतिः ऋषिः त्रिष्टुप् छंदः पितरो दे-
वता ऊर्जं मिति प्रजापतिर्ऋषिः विराट् छंदः आपो देवता पितृभ्य इति प्रजापतिः ऋषिः त्रिष्टुप् छंदः पितरो देवता
ये चेति प्रजापतिसारस्वत्यऋषयः त्रिष्टुप छंदः पितरो देवताः मधुवाता इति त्रितयस्य गोतमऋषिः गायत्री छंदः
विश्वे देवा देवताः सर्वेषां प्रसेकाख्ये कर्मणि विनियोगः ॐ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः अ-
सुं य ईयुरवृका ऋतज्ञास्ते नोवंतु पितरो हवेषु अंगिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ३ तेषां वयं सु-
मतौ यज्ञियानामपि भद्रे सौमनसे स्याम आयांतु नः पितरः सोम्यास अग्निष्वात्ताः पथिभिर्देवयानैः ३ अस्मिन्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

श्रा० ६ यत्रैस्वधयामदंत्वधिन्नुवंतुतेऽवत्वंस्मत् ४ ऊर्जंवहंतीरमृतंघृतंमधुपयः कीलालंपरिस्रुतंस्वधास्थपितृ
न्मेतर्पयत ५ पितृभ्यः स्वधायिभ्यः स्वधानमः पितामहेभ्यः स्वधानमः येचेहपितरोयेचनेहमांश्चविद्मयाउचन
प्रविद्मत्वंवेत्थयतितेजातवेदः स्वधाभिर्यज्ञंसुकृतंजुषस्व ६ मधुवाताऋतायतेमधुक्षरंतिसिंधवः माध्वीर्नः संत्वो
षधीर्मधुनक्तमुतोषसो ७ मधुमत्पार्थिवंरजः मधुद्यौरस्तुनः पिता मधुमान्नोवनस्पतिः मधुमानस्तुसूर्यः मा
ध्वीर्गावोभवंतुनः ८ तृप्यतां ३ नमोवइतिमंत्रस्यब्रह्माः प्रजापतिर्ऋषिः यजुः पितरोदेवताजपेविनियोगः नमोवः
पितरोमन्यवे नमोवः पितरः शुष्माय नमोवः पितरोजीवाय नमोवः पितरोरसाय नमोवः पितरः क्रूराय नमो
वः पितरोबलाय अमुकगोत्रः अस्मन्मातामहः अमुकशर्मा तृप्यतां ३ इदंजलं तस्मैस्वधानमः येबांधवा अबां
धवायेऽन्यजन्मनिबांधवाः तेतृप्तिमखिलांयांतुयश्चास्मत्तोभिवांछति तेगृह्णंतुमयादत्तंवस्त्रनिष्पीडनोद राम
कं सव्येनाचमनं अथपूजने ब्रह्मज्ञानमितिप्रजापतिर्ऋषिः त्रिष्टुप्छंदः ब्रह्मादेवता ब्रह्मपूजनेविनियोगः ६

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ ब्रह्मज्ञानं प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन आवः स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च
वः इति ब्रह्मपूजनं इदं विष्णुरिति मेधातिथिऋषिः गायत्री छंदः विष्णुर्देवता विष्णुपूजने विनियोगः इदं वि
ष्णुर्वि चक्रमे त्रेधा नि दधे पदं समूढमस्य पांसुरे इति विष्णुपूजनं नमस्ते रुद्रः इति मंत्रस्य परमेष्ठी प्रजापतिरृ
षिः गायत्री छंदः रुद्रो देवता रुद्रपूजने विनियोगः नमस्ते रुद्र मन्यव उतोत इषवे नमः बाहुभ्यामुत ते नमः
इति रुद्रपूजनं तत्सवितुरिति विश्वामित्रऋषिः गायत्री छंदः सविता देवता सवितृपूजने विनियोगः तत्सवि
तुरिति पूजनं मित्रस्याचर्षणीधृत इति प्रजापतिऋषिः गायत्री छंदः मित्रो देवता मित्रपूजने विनियोगः
मित्रस्य चर्षणीधृतः श्रवो देवस्य सानसि द्युम्नं चित्रश्रवस्तमं इति मित्रपूजनं इमं मे वरुणेति प्राजापत्य
श्चि सारस्वती द्वावृषयः गायत्री छंदः वरुणो देवता वरुणपूजने विनियोगः इमं मे वरुण श्रुधी हवमद्या च मृ
डय त्वामवस्युराचके इति वरुणपूजनं उ त्याय अदृश्रन्नस्येति सूर्यऋषिः गायत्री छंदः सूर्यो देवता सूर्यपूज

RajGuru Math, Shivala, Varanasi Collection

स.न्या.
७

नेविनियोगः अदृश्रन्नस्य केतवो विरश्मयो जनां अनु भ्राजंतो अग्नयो यथा ॐ हंसः शुचिषद्वसुरंतरिक्षसद्धोतावेदि
षदतिथिर्दुरोणसत् इति प्रदक्षिणां नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् प्राच्यै दिशे
इंद्राय नमः आग्नेय्यै दिशे अग्नये नमः दक्षिणायै दिशे यमाय नमः नैरृत्यै दिशे नैरृतये नमः ॐ प्रतीच्यै दिशे वरुणा
य नमः वायव्यै दिशे वायवे नमः उदीच्यै दिशे सोमाय नमः ॐ ईशान्यै दिशे ईशानाय नमः ऊर्ध्वं ब्रह्मणे नमः ॐ पा
ताले अनंताय नमः ॐ अग्नये नमः ॐ पृथिव्यै नमः ॐ ओषधिभ्यो नमः ॐ वाचे नमः ॐ वाचस्पतये नमः ॐ विष्णवे नमः
ॐ मरुद्भ्यो नमः ॐ अद्भ्यो नमः ॐ अपां पतये नमः ॐ वरुणाय नमः इति प्रतिमंत्रं उदकांजलिदानं संवर्चसेति
परमेष्ठी ऋषिः त्रिष्टुप् छंदः त्वष्टा देवता मुखमार्जने विनियोगः संवर्चसा पयसा संतनूभिरगन्महि मनसा
संशिवेन त्वष्टा सुदत्रो विदधातु रायोनुमार्ष्टु तन्वो यद्विलिष्टं देवा गातु विद इति मनस्पत इति ऋषिः विराट्छं
दः देवा गातुविदो देवता वामांग देवता विसर्जने विनियोगः देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इ

राम
७

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2
RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मं देवपत्नी स्वाहा वाचे स्वाहा बातधाः इति तर्पणं संपूर्णं अथाष्टश्राद्धानि आसनमंत्रः ततः सव्येन प्रथमे
देवतासनं ब्रह्माविष्णुरुद्रा पिंडे आसनं दर्भासनम् द्वितीये ऋषि आसनं ब्रह्मोऋषिः विष्णुऋषिः रुद्रऋषिः पिंडे
आसनं दर्भासनं २ तृतीये देवासनं वसुरुद्रादित्याः पिंडे आसनं दर्भासनं कंठोपवीति ३ चतुर्थे मनुष्यासनं सनक
सनंदनसनातनसनत्कुमाराः पिंडे आसनं दर्भासनं ४ पंचमे भूतासनं पृथिव्यादीनी भूतानि पिंडे आसनं द
र्भासनं ५ ततोपसव्येन षष्ठे पितुः पितामह प्रपितामह पिंडे आसनं दर्भासनं ६ सप्तमे मातामह प्रमातामह वृ
द्धप्रमातामह पिंडे आसनं दर्भासनं ७ अष्टमे आत्मपितुः परमात्मपितुः वृद्धपरमात्मपितुः पिंडे आसनं दर्भास
नं ८ इति पिंडे दर्भासनमंत्रः शमीपत्रप्रमाणेन पिंडं दद्यात् कृत्वा त्रिरैदद्धरेत्सप्त गोत्राणि कुलमेकोत्तरं शतं पृथिव्यां
यानि तिर्थानि तान्यासन स्थितानि च पुनः सव्येन चतुष्कोणवेदिकां कृत्वा अग्नि स्पर्शनं कृत्वा कुशमूले भूछाद
नं कृत्वा तत्र विश्वेदेवादि पितृणां आवाहनं कृत्वा ॐ विश्वेदेवादि पितरः सर्वे आयांतु अत्र स्थाने तिष्ठंतु अस्मिन्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

कालेपिंडं गृहीत्वा गयाशिरसि गुरुरूपया विष्णुप्रसादेन त्रयो भवंतु ३ प्रथमदेवताश्राद्धे देवतात्रयं ब्र
ह्मा विष्णु महेश्वराः पिंडत्रयं दद्यात् इयं भूमिरियं गया इदमुदकं फल्गुतीर्थस्य पिंडे प्रेतशिलां गच्छेत् १
द्वितीये ऋषिश्राद्धे देवतात्रयं ब्रह्मर्षि रुद्रर्षिः पिंडत्रयं दद्यात् इदं भूमिरियं गया इदमुदकं फल्गु
तीर्थस्य पिंडे प्रेतशिलां गच्छेत् २ तृतीये देवश्राद्धे देवतात्रयं वसुरुद्रादित्याः पिंडत्रयं दद्यात् इयं भूमिरि
यं गया इदमुदकं फल्गुतीर्थस्य पिंडे प्रेतशिलां गच्छेत् ३ कंठोपवीति चतुर्थे मनुष्यश्राद्धे देवतात्रयं सनक
सनंदन सनत्कुमाराः पिंडत्रयं दद्यात् इयं भूमिरियं गया इदमुदकं फल्गुतीर्थस्य पिंडदानार्थं प्रेतशिलां ग
च्छेत् ४ अपसव्येन पंचमे भूतश्राद्धे देवतात्रयं पृथिव्यादिभूतेभ्यः पिंडत्रयं दद्यात् इयं भूमिरियं गया इदमुदकं
फल्गुतीर्थस्य पिंडे प्रेतशिलां गच्छेत् ५ ततोऽपसव्येन षष्ठे पितृश्राद्धे देवतात्रयं पितामह प्रपितामह वृ
द्धप्रपितामहं पिंडत्रयं दद्यात् इयं भूमिरियं गया इदमुदकं फल्गुतीर्थस्य पिंडे प्रेतशिलां गच्छेत् ६ सप्तमे मा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तच्छ्राद्धदेवतां त्रयं मातामह प्रमातामह वृद्धप्रमातामह पिंडत्रयं दधात् इयं भूमिरियं गयाइदमुदकं फल्गु
तीर्थस्य पिंडेभेन ग्निलां गच्छेत् ७ अष्टमे आत्मश्राद्धं देवता त्रयं अहं आत्म पितुः अहं आत्म प्रपितुः अहं आत्म वृद्धप्र
पितुः पिंडत्रयं दधात् इयं भूमिरियं गया इदमुदकं फल्गुतीर्थस्य पिंडेभेन ग्निलां गच्छेत् ८ स्नानसूत्रं गंधं पुष्पं धूपं दी
पं नैवेद्यं तांबुलं दक्षिणाभिः संपूज्य विसर्जयेत् फल्गुतीर्थं गयाशिर पित्र पिंडं करोम्यहं मम पितुः स्वर्गवासोऽस्य
पिंडदान विसर्जयेत् गयास्थितो जनार्दनो देवो मम पिंडं गृह्णातु तस्मै मे गयासिद्ध दत्ताभि ब्रह्मा विष्णु रुद्र साक्षिणो
भवंतु इति अष्टश्राद्धविधिः संपूर्णम् मनुः ब्राह्मणाः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः चतुर्थ एकजातिस्तु शूद्रो
नास्ति तु पंचमः सुराणैव मलमन्नानां पाप्मा च मलमुच्यते तस्माद्ब्राह्मणराजन्यो वैश्यश्च न सुरां पिबेत् ३ अज्ञानाद्ब्रा
रुणी पीत्वा संस्कारेणैव शुद्ध्यति मतिपूर्वं मनिर्देश्य प्राणान्तिकमिति स्थितः ४ अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्ट
मेव च पुनः संस्कारमर्हति त्रयो वर्णा द्विजातयः ५ वपनं मेखला दण्डो भैक्ष्यचर्या व्रतानि च निवर्तन्ते द्विजातीनाम्पु

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सं० न्या० नः संस्कारकर्मणि ॥ अभोज्यानान्तु भुक्त्वान्नं स्त्रीशूद्रोच्छिष्टमेव च जग्ध्वा मांसमभक्ष्यं च सप्तरात्रं यवान्पिबेत्
९ अर्थ जलमिश्रितसक्तुरूपेण यवागुरूपेण वा यवान्पानयोग्यान् कृत्वा सप्तरात्रम्पिबेत् व्यासः ब्रह्मचा
रीगृहस्थो वा वानप्रस्थोथवा पुनः विरक्तः सर्वकामेभ्यः परिव्राज्यं समाश्रयेत् यावद्वर्णविभागोस्ति यावद्वेदः
प्रवर्त्तते तावत्संन्यासोग्निहोत्रं च कर्त्तव्यं तु कलौ युगे विष्णुपुराणे यत्कृते दशभिर्वर्षैस्त्रेतायां हायनेन तत् द्वापरे
तत्तु मासेन अहोरात्रेण तत्कलौ तपसो ब्रह्मचर्यस्य जपादेश्च फलं द्विजः प्राप्नोति पुरुषस्तेन कलिः साध्वीति
भाषितं इति कलावल्पेन काले न ब्रह्मचर्यस्य जपादेरधिकं फलं वदन् ब्रह्मचर्यादिप्रधानस्य पारिव्राजस्य कला
वनुष्ठेयत्वं सूचयति संन्यासे कस्याधिकारः तत्राह ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहादित्यादिकौर्म
वचनस्य सत्त्वात् उत्तरत्र पुराणं भैक्षार्थं कृतबुद्धिं नरेश्वरं विदेहराजं महिषी दुःखिताप्रभाषत त्यक्त्वा धनान्यपत्यं राम
दारांश्च रत्नानि विविधानि च पंथानं पावकं हित्वा जनको मौंड्यमास्थितः तद्दृष्ट्वा प्रिया भार्या भैरव्य वृत्तिम किं ८

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

चनं धान्यमुष्टिमुपासीनन्निरीहं गतमस्त्रमिति राजधर्मेषु युधिष्ठिरं प्रत्यर्जुनवाक्यस्य सत्वात् स्तेनत्रयमुख्या
हत्य निर्ममो निरहंकृतः ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद् गृहादित्यपरार्कोक्तेश्च ब्राह्मणः क्षत्रियो वैश्य
स्त्रैको गच्छेद्वने कृती सन्न्यासे हंध नान्यापसर्वभूत दयापरः इति धर्मसूत्राबुक्तत्वात् त्रयाणां वर्णानां वेदमधीत्य
चत्वार आश्रमाः इति कात्यायनसूत्रस्य सत्वात् त्रैवर्णिकानां सन्न्यासो विधते नात्र संशयः स्त्रीणाम् तत्रोप
वीतानां त्यागपूर्वैकदण्डग्रहणमिति ब्रह्माण्डपुराणे वैराग्ये सति माने वक्ष्यमाणे परिपुज्यते राजवान्ननु विप्रो
पि वेदवेदांगवित्तम इत्यादि ब्रह्मवैवर्ते । अकार्यकारिणां दानं वेगो नद्याश्च शुद्धिकृत् शोध्यस्य मृच्च तोयं
च सन्न्यासो द्विजन्मनामिति याज्ञवल्क्यादिस्मृतौ चवाक्यत्वेन आत्मन्यग्नीन्समारोप्य ब्राह्मणः प्रव्रजे
द्गृहादित्यादि मनुवाक्यस्य ब्राह्मणपदस्यैव त्रैवर्णिकोपलक्षणत्वात् प्रव्राज्यावसितायत्रयो वर्णा द्विजा
तयः निर्वाहकास्ते द्विसंदासत्वं क्षत्रवैश्ययोरिति कात्यायनवाक्ये क्षत्रियहिनसाय श्चिन सूत्र नाथोपतेः कूर्मेच

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

नुईशा ध्याये पशुपौत्र सुशीलस्यानुर्ग्यां श्रमम न हेरा प्रस्तावे सोनु गृह्या यथाजानां सुशील शील संपुनं प्राप्य
त्वेयति आगत्य हं तप साक्षीणा कल्मषं सान्द्या सिक्तं विधिं सत्तना पित्वा विचक्षणाः दृष्टैत दीक्षां शानं स्वशा
स्वाविहितेन ब्रतं अग्रोथं वेदसारं तं पशुपाश विमोचनं मित्या दिवा कानां मत्वात् न कर्मणा न प्रजया धनेन त्या
गेनैके ऽमृतत्वमानशुः अथ परि ब्राह्मणो विवर्णो वासो मुण्डो ऽपरिग्रही शुचिरद्रोही भैक्ष्यमाणो ब्रह्म
भूयाय कल्पते एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेद् गृहाद्वा
वनाद्वेत्य विशेषश्रुत्या ब्राह्मणः क्षत्रियो वापि वैश्यो वा प्रव्रजेद् गृहात् त्रयाणां वर्णानां वेदमधीत्य चत्वा
र आश्रमा इति स्मृत्यनुग्रहो त्पया क्षत्रिय वैश्ययोरपि सत्याशाधिकारासिद्धेः वार्तिककारैः प्युक्तं मन्त्र
पाणामथि वर्णानाम् श्रुतो संन्यासदर्शनात् ब्राह्मणस्यैव संन्यासः इति श्रुत्वा विरुध्यते इत्यादि वित्त
र भयान्नाशंसि । एवमष्टोश्राधो नं ब्रह्मणश्च नुरोधन तस्मिन्दिने द्वितीये वा प्रातः वा र्थ मूर्ध्नि पंचषट्

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वा केशान्स्थापयित्वा कक्षोपस्थवर्जं केशश्मश्रुलोमादिवपनं विधाय नखानि निकृंत्य यथाविधि स्नात्वा कौपीना
छादनाद्युपयुक्तं स्वात्मन आचार्याय दक्षिणार्थं होमार्थं च द्रव्यं पृथक् कृत्वा सति विभवे पुत्रदाराश्रितादिभ्यो धनादि
विभज्य संतर्प्य स्त्रीपुंधनं संन्यासदातृभ्यो विप्रेभ्यो यतिभ्यश्च विभज्य तदान्तपात्रं सर्वमर्थिभ्यो दद्यात् असति वि
भवे स्वात्मानमेव तेभ्यो निवेदयेत् अथ देवागारे अग्न्यागारे नदीतीरे गोष्ठे आरण्ये वाश्वत्थोदेशे स्वकौपीनादि विवर्णं
कृत्वा वैणवं सकलं साग्रं ग्रंथियुक्तं योनिरहितं अदग्धं सत्वचं शिरःप्रमाणं ललाटांतं भ्रूप्रमाणं वा दंडमकृशमस्थूलं
समूलोत्पाटितं विप्रानीतं समपर्वग्रंथियुक्तं समुद्रकं संपाद्य शंखोदकेन १०८ प्रणवेन पुरुषसूक्तेन च केशवादिनाम
मंत्रैरभिषिच्य संस्थाप्य स्मृत्यर्थसारे दंडं जलपवित्रं च शिक्यं पात्रं कमंडलुं आसनं कौपीनमाच्छादनं कंथा पादुके च इति
दक्षः यष्टिं जलपवित्रं च शिक्यं पात्रं कमंडलुमिति पंच वा संस्थाप्योपविश्य उदगयनादौ एकादश्यां द्वादश्यां वा आतुर
श्चेत् तस्मिंश्चित्काले वा देशकाले स्मृत्वा परमहंसादिसंन्यासग्रहणं करिष्ये इति संकल्प्य तदंगत्वेन विहितमादौ गणे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शपूजन पुण्याहवाचनमातृकापूजनं नांदीश्राधानिकरिष्ये इति संकल्प्य तानिकृत्वा आचम्य प्राणानायम्य ब्रह्मा
जलिं विधायन साजयेत् ॐ ब्रह्मणेनमः ॐ विष्णवे नमः ॐ रुद्रायनमः ॐ सोमायनमः ॐ आत्मनेनमः ॐ अंतरा
त्मनेनमः ॐ परमात्मनेनमः इत्युच्चार्य वेदादीन् जपित्वा सक्तुमुष्टित्रयं प्रणवेनत्रिः प्राश्य आचम्यनाभौकरं दत्वामंत्र
येदं भिर्मंत्रैः ॐ अं आत्मनेस्वाहा ॐ अंतरात्मनेस्वाहा ॐ मं परमात्मनेस्वाहा ॐ प्रजापतयेस्वाहा इतिततः पयो दधियुत
माज्यमपोवात्रिवृदसीति प्रथमं प्रवृदसीति द्वितीयं विवृदसीति तृतीयं प्राश्य आपःपुनंत्विति जलं प्राश्याचम्यो
पविश्य ततः उपवासं करिष्यामीति संकल्पयेत् ततः स्वपेत्। ब्राह्मेमुहूर्ते गंगातीरं गत्वा पूर्वाभिमुखः स्थित्वा गं
गासन्मुखं विधिवत् कुशकांडिकाख्य कार्यं कृत्वा। देशकालौ संकीर्त्य संन्यासांगत्वेन विहितं प्राणादिहोमं पूर्वकं
तथास्नानयोग्यसंपादनार्थं उपपातकादि सकलपापनिवृत्ति पूर्वकं सावयवभ्युध्यर्थं च विरजाहोमं च करिष्ये इति
संकल्प्य। अपवित्रः पवित्रोवा सर्वावस्थां गतोपिवायः स्मरेत्पुंडरीकाक्षं सबाह्याभ्यांतरः शुचिः ततो गणेशं ध्याये

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

तं एकदंतं महाकायं लंबोदरगजाननं विघ्ननाशकरं देवं हेरंबं प्रणमाम्यहं इतिध्यानं अथपूजनं कारयेत् विनायक
नमस्तुभ्यं उमामलसमुद्भव इमांमया कृतां पूजां गृहाण सुरेश्वरः इत्यावाहनं १ अलंकारसमायुक्तं मुक्तामणिवि
भूषितं स्वर्णसिंहासनं चारु प्रीत्यर्थं प्रतिगृह्यतां २ इत्यासनं० गौरीसुतनमस्तेस्तु शंकरप्रियकारकं भक्त्यापा
द्यं मयादत्तं गृहाण सुनतप्रियं इति पाद्यं०३ व्रतमुद्दिश्य विघ्नेश गंधपुष्पादिसंयुतं गृहाणार्घ्यं मयादत्तं सर्वसि
द्धिप्रदायकं ।४ इत्यर्घ्यं०४ गणाधिप नमस्तुभ्यं गौरीसुत गजानन गृहाणाचमनीयं त्वं सर्वसिद्धिप्रदायकं
५ इत्याचमनं० अनाथनाथ सर्वज्ञ गीर्वाणप्रतिपूजित स्नानं पंचामृतं देव गृहाण गणनायकं । इति पंचामृतं०
६ गंगाजलसमानीतं सुवर्णकलसे स्थितं स्नानं स्वीकुरु देवेशाकपर्दिं गणनायकं इति शुद्धोदकं०७ हरिद्र
स्त्रद्वयं देव देवांगवसनोपमं भक्त्या दत्तं गृहाणेश लंबोदर गजानन ८ इति वस्त्रं० नानालंकारसंयुक्तं नाना
रत्नविभूषितं अनेकदिव्याभरणं लंबोदर हरात्मज इत्याभरणं० विराजतं ब्रह्मसूत्रं हेममंतु विनिर्मितं भाल

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वंद्र नमस्तुभ्यं गृहाण सुखंदित इति यज्ञोपवी॰१० गंधकर्पूरसंयुक्तं दिव्यं चंदनमुत्तमं विलेपनं सुश्रेष्ठ प्रीत्यर्थं प्र
तिगृह्यतां ११ इति गंधं॰ अक्षतांस्तंदुलान्शुभान् कुंकुमेन विराजितान् मया निवेदितान् भक्त्या अक्षतान् प्रतिगृह्य
तां इति अक्षितां॰१२ माल्यादीनि सुगंधीनि मालत्यादि मया प्रभो मया दत्तानि देवेश पुष्पाणि प्रतिगृह्यतां इति पु
ष्पाणि॰१३ वनस्पत्यार संधूपं गंधमुत्तमं आघ्रेण सर्वदेवेश धूपं च प्रतिगृह्यतां १४ इति धूपं॰ हर्षद सर्वलोका
नां सर्वेषां विदुषां वर गृहाण भगवन् दीपं रुद्रप्रिय नमोस्तु ते इति दीपं॰२५ अनेकस्वादुसंयुक्तं नानाफलसमन्वि
तं पायसं मोदकं चैव गृहाण परमेश्वर।१६ इति नैवे॰ गणाधिप नमस्तुभ्यं गौरीसुत गजानन गृहाणाचमनीयं त्वं
सर्वसिद्धिप्रदायकं इत्याचमनं॰१७ एलालवंगसंयुक्तं कर्पूरखंडमिश्रितं तांबूलं च गृहाणेश प्रसीद परमेश्वर।
इति तांबूलं॰१८ हिरण्यगर्भगर्भस्थं हेमबीजं विभावसो। अनंतपुण्यफलद गृहाण परमेश्वर।इति दक्षिणां॰१९ व
क्रतुंड महाकाय सूर्यकोटिसमप्रभं निर्विघ्नं कुरु मां देव सर्वकार्येषु सर्वदा २० इति गणेशपूजनविधिः अथ नक्षत्रपूजन

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लिख्यते। मध्ये तु भास्करं विघात् शशिनं पूर्वदक्षिणे दक्षिणे लोहितं विघात् बुधः पूर्वोत्तरेण चउत्तरे तु गुरुं वि
घात् पूर्वेणै व तु भार्गवं पश्चिमे च शनिं विघात् राहुं पश्चीम दक्षिणे पश्चिमोत्तरतः केतुं स्थापयेत् शुक्लतंदुलैः
वर्त्तुलं मंडलं विघात् अर्द्धचंद्रं निशाकरं त्रिकोणमंगारकश्चैव बुधस्तु धनुषाकृतिं पद्माकृतिं गुरुं विघात्त्र
तुष्कोणं च भार्गवं पुरुषाकृतिं शनिं विघाद्राहुश्च मकराकृतिः खड्गाकृतिं लिखेत्केतुं इत्येते च ग्रहा स्मृताः
शुक्रार्कौ प्राङ्मुखौ ज्ञेयौ गुरुभौमौ उदङ्मुखौ प्रत्यङ्मुखो शनिसोमौ शेषा दक्षिणामुखाः रक्तं तु भास्करं वि
घात्श्वेतवर्णं तु चंद्रमा रक्तवर्णस्ततो भौमः पीतवर्णस्ततो बुधः पीतवर्णस्ततो जीवः श्वेतवर्णस्तु भार्गवः
कृष्णवर्णं शनिं चैव राहुकेतौ च धूम्रकौ द्वादशांगुलमादित्यं सोमं चाद्विगुणाकृतिं भौममंगुलचत्वारि दशांर्द्ध
च बुधस्मृतः षडंगुलो भवेज्जीवो भार्गवं च षडंगुलं शनिरंगुलचत्वारि राहुः स्यात्वं च विंशति पंचविंशतिमा
त्राश्च केतवः कथिता बुधैः हस्तमात्रं खनेत्कुंडं मेखला त्रयसंयुतं मेखला विस्तारं बुधैः उत्क्रमं द्वादशाष्टचतुष्टयं

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

वेदिहस्तद्वयं कुर्यात मंडलं परि लिख्यते आवाहयामि तां देवीं भूत धात्रीं सुलक्षणां कामदा वैष्णवी वृद्धिः सर्वत्र
पूजनं आगच्छंतु धृतिर्मे धाम स्वं गच्छ च सुधा सर्व मंगलं सिद्धिः यजमानस्य रक्षित्विजेः आदित्यः कस्यपगोत्रे
अत्रिगोत्रेच चंद्रमाः भरद्वाजो भवेद्भौमः आत्रेयस्तु बुधः स्मृतः जीवस्तु अंगिरा गोत्रे शुक्रश्चैव तु भार्गवः
शाण्डिल्यस्तु सूर्यगोत्रे राहुः पैठिन्यगोत्रजः केतुर्जैमिनिगोत्रे ग्रहगोत्र मुदाहृतं अथ आवाहनमध्येक
लिंगदेशे कार्तिके शुक्लसप्तम्यां जातं विशाखा नक्षत्रे क्षत्रियं काश्यपगोत्रं द्वादशांगुलं द्विभुजं पद्महस्तं
पूर्वाभिमुखं सप्ताश्ववाहनमीश्वराधिदैवतं रविं ध्यायेत् ॐ भूर्भुवः स्वः आदित्य इहागच्छ इह तिष्ठः आकृष्णे
ति हिरण्यस्तूप ऋषिः सविता देवता त्रिष्टुप् छंदः आदित्य प्रीतये होमे विनियोगः आकृष्णेन रजसा वर्तमानो
निवेशयन्नमृतं मर्त्यं च हिरण्ययेन सविता रथेन देवो याति भुवनानि पश्यन् सूर्याय पाद्यं अर्घ्यं आचमनं स्ना
नं चंदनं अक्षतं पुष्पं धूपं दीपं नैवेद्यं तांबुलं पुंगीफलं दक्षिणां समर्पयामि॰ रक्तपताकादानं १ आग्नेयो सोमं समुद्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मार्गशीर्षे कृष्णे चतुर्दश्यां जातं कृत्तिकानक्षत्रे वैश्यं अत्रिगोत्रं पश्चिमाभिमुखं अर्द्धचंद्रं द्विभुजं गदाहस्तं मृग
वाहनं उमाधिदैवतं मायाप्रत्याधिदैवतं चंद्रं ध्यायेत् ॐ भूर्भुवः स्वः सोम इहागच्छ इह तिष्ठ इमं देवेति गौत
म ऋषिः सोमो देवता अनुष्टुप् छंदः सोमप्रीतये होमे विनियोगः इमं देवा असपत्नꣳ सुवध्वं महते क्षत्राय मह
ते ज्यैष्ठ्याय महते जानराज्याय इंद्रस्य इंद्रियाय इंद्रममुष्य पुत्रममुष्यै पुत्रमस्यै विशाये षवो स्माकं राजा सोमो
ऽस्माकं ब्राह्मणानांꣳ राजा श्रीसोमाय पाद्यादिकं ० श्वेतपताकादानं। दक्षिणे मंगलं अयोध्यायां पौष्यं चतु
र्दश्यां जातं पूर्वानक्षत्रे भारद्वाजगोत्रं क्षत्रियं चतुरंगुलं द्विभुजं त्रिकोणं उत्तराभिमुखं शक्तिहस्तं मेषवाहनं स्कंदा
धिदैवतं क्षितिप्रत्याधिदैवतं मंगलं ध्यायेत् ॐ भूर्भुवः स्वः कुजदेवता इहागच्छ इह तिष्ठ अग्निर्मूर्द्धेति विरूपाक्ष
ऋषिः कुजो देवता गायत्री छंदः कुजप्रीत्यर्थे होमे विनियोगः अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं अपा
ꣳ रेताꣳसि जिन्वति। श्रीमंगलाय पाद्यादिकं ० रक्तपताकादानं। ईशाने बुधं मगधदेशोद्भवं माघशुक्लद्वाद-

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स॰न्या॰ स्यां जातं धनिष्ठा नक्षत्रे वैश्यं अत्रिगोत्रं धनुषाकृतिं दशांगुलं दक्षिणाभिमुखं पीतवर्णं विष्णुअधिदे
१४ वतं बुधं ध्यायेत् ॐ भूर्भुवः स्वः बुधदेवता इहागच्छ इहातिष्ठ उद्बुध्यस्वेति अत्रिर्ऋषिः बुधो देवता त्रिष्टुप्छं
दः बुधप्रीतये होमे विनियोगः उद्बुध्यस्वाग्ने प्रतिगृहि त्वामिष्टापूर्ते संसृजेथामयं च अस्मिन्सधस्ते
अध्युत्तरस्मिन्विश्वेदेवा यजमानस्य सीदत श्रीबुधाय पाद्यादिकं॰ पीतपताकादानं ४ उत्तरे गुरुः सिंधुदे
शे फाल्गुन शुक्ल एकादश्यां जातं उत्तराफाल्गुनि नक्षत्रे ब्राह्मणं अंगिरसगोत्रं षडंगुलं पद्माकारं उत्तराभिमुखं पी
तवर्णं ब्रह्माधिदैवतं गुरुं ध्यायेत् ॐ भूर्भुवः स्वः गुरो इहागच्छ इहतिष्ठ बृहस्पते इति अंगिरा ऋषिः बृहस्पतिर्देवता बृह
स्पतिप्रीतये होमे विनियोगः ॐ बृहस्पते अतियदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु यद्दीदयच्छवस ऋतप्रजात तद
स्मासु द्रविणं धेहि चित्रं स्वाहा श्रीबृहस्पतये पाद्यादिकं॰ पीतपताकादानं ५ पूर्वे शुक्रः भोजकटदेशे चैत्र शुक्ल राम
नवम्यां जातं पुष्यनक्षत्रे ब्राह्मणं षडंगुलं चतुःकोणं मंडुकवाहनं पूर्वाभिमुखं शुक्लवर्णं श्वेतांबरं चतुर्भुजं इंद्राधि १४

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

दैवतं इंद्राणी प्रत्यधिदैवतं भृगुं ध्यायेत् ॐ भूर्भुवः स्वः भृगो इहागच्छ इह तिष्ठ ॐ अन्नात्परिश्रुतो रसमिति प्रजापत्य
श्विसरस्वती इंद्रा ऋषयः अतीजगती छंदः शुक्रो देवता शुक्र प्रीतये होमे विनियोगः अन्नात्परिश्रुतो रसं ब्रह्मणा व्यपि
वत्क्षत्रं पयः सोमं प्रजापतिः ऋतेन सत्यमिंद्रियं विपानं शुक्रमंधस इंद्रस्येंद्रियमिदं पयोमृतं मधु स्वाहा इति श्री शुक्राय
पाद्यादिकं ० श्वेत पताकादानं । पश्चिम दिशि अष्टम्यां रेवति संयुतायां सौराष्ट्रदेशे जातं काश्यपगोत्रं राजमहाभं पुरु
षाकृतिं मंडलमध्यस्थं ओंकारस्याधिपतिं यमाधिदेवतं शनिं ध्यायेत् ॐ भूर्भुवः स्वः शनिं आवाहयामि शनि इहागच्छ
इह तिष्ठ शनि प्रीतये होमे विनियोगः सन्नोदेवी ति वामदेव ऋषिः शनिर्देवता गायत्री छंदः सन्नोदेवी रभिष्टय आ
पो भवन्तु पीतये संयो रभिस्रवंतु नः श्री शनैश्चराय पाद्यादिकं ० कृष्ण पताकादानं ८ नैरृत्यां राहुं जैमीनिकदेशे ज्ये
ष्ठे पौर्णमास्यां जातं भरणी नक्षत्रे पैठिन्यस गोत्रं पंच विंशां गुलं कृष्णवर्णं मकराकृतिं दक्षिणाभिमुखं चतुर्भुजं ख
ड्ग चर्म गदाहस्तं कालाधिदेवतं सर्पाः प्रत्यधिदैवतं राहुं ध्यायेत् ॐ भूर्भुवः स्वः राहो इहागच्छ इह तिष्ठ कयानश्चित्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स०न्या० तिवामदेव ऋषिः राहुर्देवता गायत्री छंदः राहुप्रीतये होमे विनियोगः ॐ कयानश्चित्र आभुवदूती सदावृधः सखा क
१५ या सचिष्ठया वृता स्वाहा। श्री राहवे पाद्यादिकं स० ८ कृष्णपताकादानं वायव्ये केतुं हिमवंतपर्वते आषाढ कृष्ण
चतुर्दश्यां जातं भरणीनक्षत्रे जैमिनिगोत्रं दक्षिणाभिमुखं षडंगुलं खड्गाकारं धूम्रवर्णं गदाहस्तं गृध्रवाहनं चित्रगुप्ता
धिदैवतं ब्रह्मप्रत्यधिदैवतं केतुं ध्यायेत् ॐ भूर्भुवः स्वः केतुदेवता इहागच्छ इह तिष्ठ केतुं कृण्वन्निति मधुच्छन्द ऋ
षिर्गायत्री छंदः केतुर्देवता केतुप्रीतये होमे विनियोगः केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे समुषद्भिरजायथाः
श्री केतवे पाद्यादिकं ० कृष्णपताकादानं। अथादौ कलशस्थापनविधिः शुभसमये शोभने भूतले गोमयेनोपलि
प्य। तत्र चतुरस्रात्मकं मंडलं कृत्वा गुरूपदिष्टमार्गेण सर्वतोभद्रमंडलं अष्टदलचतुरस्रात्मकं वा मंडलं विरच्य तस्य
कर्णिकायां तंदुलेनापूर्य। तस्योपरि कुशानास्तीर्य ॐ ह्रीं आधारशक्तिकमलासनाय नमः इति गंधपुष्पाभ्यां संपूज्य रामे
तस्योपरि। अछिद्रं सुंदरं घटं समलं स्थाप्य। पश्चात् शुद्धोदकेनापूर्य सूर्यमंडलात् अंकुशमुद्रया गंगे च यमुने चैव ९८

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

गोदावरी सरस्वती नर्मदे सिंधु कावेरि जलेऽस्मिन् संनिधिं कुरु। इति मंत्रेण तीर्थान्यावाह्य धेनुमुद्रया अमृतीकृत्य अ
थ कलशध्यानं कलशस्य मुखे विष्णुः कंठे रुद्र समाश्रितः मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः कुक्षौ तु
सागराः सर्वे सप्तद्वीपा वसुंधराः ऋग्वेदो यजुर्वेदः सामवेदो ह्यथर्वणः अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः
अत्र गायत्री सावित्री शांतिः पुष्टिः करी तथा। आयांतु देवपूजार्थं दुरितक्षयकारकाः सर्वे समुद्राः सरितः स्ती
र्थानि जलदा नदाः इति कलशध्यानं। आवाहयामि वरुणं शुद्धं सुक्ष्मं तु निर्मलं पाशहस्तं महातेजा मकरध्वज
लांछनं नीलकेशायतं सूक्ष्मं हेमपानं महाबलं बहुकांचनमालाढ्यं संस्मरेन्नं करालयं लोकपालैश्च सहितं
स्वस्तिनः परिपात्वते इति वरुणध्यानं। कंठे त्रिगुणं तंतुं संवेष्ट्य श्वेतवस्त्रयुग्मं परिधाय। तस्योपरि अक्षत
नारिकेलयुतं पुंगिफलयुतं वा संस्थाप्य तं कुंभं चैव कर्पुरं कस्तुरीं चैव दापयेत्स्तगम वेष्टितग्रीवं मणिर
त्नप्रवालकैः शोभितं तु सहितं कुंभं मंडले तत्र स्थापयेत् धूपं दीपं नैवेद्यं तांबुलं समर्पयामि नमः पश्चात् पंचपुष्पां

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

जलिं दद्यात् इति कलशस्थापनविधिः कलशाग्ने शंखस्थाप्य शंखोपरि शंखमुद्रां प्रदर्शनं गंधपुष्पाक्षतैः संपूज्य
कलशे दीपमंत्रस्य। गुरुपरिष्ठ मार्गेण आवाह्य पूजयेद्यथा संसारमरुकांतार महामोहनिवृत्तये तदिदममृतं चक्षु
र्दीपायं शिवमर्पयातं। शंखोदकेन मलमुखार्घ्यं इष्टदेवतायै स्नानं समर्पयामि नमः आचमनं समर्पयामि नमः वा
सः समर्प॰ यज्ञोपवीतं स॰ गंधं समर्पयामि॰ अक्षतं समर्पया॰ धूपं दीपं नैवेद्यं स॰ उत्तरापोशनं आचमनं तांबुलं स॰
दक्षिणां स॰ नानाफलं समर्प॰ नीराजनदीपं स॰ पश्चात्पुष्पांजलिं दद्यात् एवं शंखं पूज्य। आचार्य उत्तराभिमुखो
भूत्वा। चतुष्कोणं वेदिकां कृत्वा। पूर्ववदग्निस्थापनं कुर्यात् आदाव ग्निध्यानं। चत्वारि शृंगास्त्रयो अस्य पादा द्वे शी
र्षे सप्त हस्तासो अस्य त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश। इति ध्यानं। अग्नये नमन्नमत् पृथिव्यै
समनमत् यथाग्निः पृथिव्याः समनमदेवं मह्यं भद्राः सन्नतयः सन्नमंतु। अथ वैश्वानरलोकवासः एकैनवसति स्व राम
र्गे द्वाभ्यां पाताल एव च तृतीये मर्त्यलोके च एवं वसति पावकः धृतिः स्तुति थिवा रक्षसमहद्वीपाश्चतुर्युगाः एकोन ~ १६

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

त्य त्रिभिर्भागं ज्ञेयो वैश्वानरः सदा। अष्टादशपुराणानि तिथिवारसमन्वितं। रुद्रे नैऋत्ये हरे भागं शेषमग्निश्च उच्यते
से कातिथिवार युताहुता तां शेषे गुणे ऽग्ने भुवि वह्निवासः सौख्याय होमे शशि युग्मशेषे प्राणार्थनाशो दिवि भूत
ले च। अग्नेः शुभाशुभं। सूर्यभुक्ताच्च नक्षत्रात् त्रिधा छित्वा त्रयं त्रयं आदित्यश्चैव बुधः शुक्रः शनिश्चंद्रः कुजस्तथा जीवे
राहुश्च केतुश्च होमे चक्रे न शुभो भवेत्। आदित्ये च भवेच्छोको बुधे संपत्तिरुत्तमा शुक्रे स्याच्च धनप्राप्तिः शनैश्च
रा च जायते। चंद्रे भवति लाभश्च भौमे च व धनं धनं गुरौ परमकल्याणं राहु हानिश्च जायते केतौ च प्राण संदेहो
वह्नि चक्र मुदाहृतं। इति ग्रहमुखे आहुति विचारः प्रयोतना त्यंच ५ नगां ७ क ९ सूर्य १२ नवेंदु १९ षड्विंश २६
मितानि भानि। शेते मही नैव गृहं विधेयं तडागवापी खननं न शस्तं आकाशे वसति मृत्युः पाताले च धनक्षयं धन
धान्यकरो देवो मृत्युलोके च पावकः इति वैश्वानरस्ये लोकवासः ३ [illegible] अथ विचः प विज्ञो वास
दीवस्यां गतोपि वाय: स्मरेत् पुंडरीकाक्षं सबाह्याभ्यंतरः शुचिः आवाहयाम्यहं देवं [illegible] ब्रह्मा हरिश्च रुद्र

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

 त्वं देवेश सम्मुखो भव २ त्वं देव वरदो भव। पंचमकुंडे श्रीलोकनाथ षट् वक्त्र त्रिनेत्र हव्यवाहन। सप्तजिह्व प्रीतो
 भव २ त्वं देव वरदो भव प वननवाहन वैश्वानर देवतां ॐ काली कराली श्वेता धूम्रा नीला रक्ता कपिला इहागच्छ इह
तिष्ठ सुप्रीतो भव अरुणी माता वरुणः पिता शांडिल्य गोत्रः सप्तजिह्वा आकाश ऋषिः विराट् गायत्री छंदः वैश्वा
नर देवता आगच्छ पूर्व दिशि तिष्ठ दक्षिण दिशि तिष्ठ पश्चिम दिशि तिष्ठ उत्तर दिशि स्थितो भव। प्रथम काष्ठ भ
व क्षावै द्वितीया घृत भक्षका तृतीया यव भक्षा स्याच्चतुर्थी तिल तंदुलं पंचमे दधि भक्षा तु षष्ठि तु क्षीर भक्षका। सप्त
मी शर्करा भक्षा सप्तजिह्वा प्रकीर्तिताः एवं त्वं देव सर्वेषु भूतले शुभ तिसंस्थितः वैश्वानर आवाहनं पूर्वं त्वं जा
तः पूर्ववत् अग्निस्थापनं कुर्यात् ॐ अत्र चंदनं पुष्पं धूपं दीपं नैवेद्यं तांबुलं। अर्घ मुद्रा फल दक्षिणां प्रथाद् गं
धाक्षता अर्चनं दिग्पाल पूजनं। पूर्ववत् मंत्र पदेत् पत्रपुष्प पनारायणाय प्रियतां अग्निदेवाय अर्चनं आनंद पू
र्णाय स्वाहा अपपंच प्राणा हुतिं हुयात् ॐ प्राणाय स्वाहा। ॐ अपानाय स्वाहा ॐ व्यानाय स्वाहा। ॐ उदानाय स्वाहा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ॐ समानाय स्वाहा। ॐ भूः स्वाहा। इदं भुवे ॐ भुवः स्वाहा इदं वायवे ॐ स्वः स्वाहा। इदं सूर्याय। ॐ अग्नये स्वाहा। इदं व
ह्नये। ॐ प्रजापतये स्वाहा। इदं प्रजापतये। ॐ विष्णवे स्वाहा इदं विष्णवे। ॐ रुद्राय स्वाहा। इदं रुद्राय। ॐ इंद्राय स्वा
हा। इदं इंद्राय ॐ सूर्याय स्वाहा। इदं सूर्याय। ॐ सोमाय स्वाहा। इदं सोमाय। ॐ सूर्यादिनवग्रहेभ्यो स्वाहा। इति प्र
थमे घृताहुतिं हुत्वा। अथ प्राकल्पहोमः ततः प्राणाहुं दद्यात् ॐ प्राणापानव्यानसमानोदाना मे शुद्ध्यंतां ज्यो
तिरहं विरजा विपाप्मा भूयासं स्वाहा २ प्राणादिभ्य इदं न मम। ॐ वाक्पाणिपादपायूपस्था मे शुद्ध्यंतां ज्योति
रहं विरजा विपाप्मा भूयासं स्वाहा। ३ वाक्पाणिपादादिभ्य इदं न मम। ॐ मनोबुद्धिचित्ताहंकारांतःकरण
चतुष्टयानि मे शुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा। मनोबुद्ध्यादिभ्यः इदं न मम। ॐ शिरःपृष्ठो
दरजंघा मे शुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ४ शिर आदिभ्यः इदं न मम ॐ शब्दस्पर्शरूपरसगंधा
मे शुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ५ शब्दादिभ्यः इदं न मम। ॐ अस्थिमांसादिरुधिरमेदोमज्जा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मेशुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ५ अस्थिमांसादिभ्यः इदं न मम। ॐ नखलोमत्वङ्गाङ्गो
मेशुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ६ लोमनखादिभ्य इदं न मम। ॐ श्रोत्रत्वक्चक्षुजिह्वाघ्राणवा
चो मेशुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ७ श्रोत्रादिभ्यः इदं न मम। ॐ श्वेतपीतकृष्णहरित
लोहितं पिंगलाख्या मेशुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ८ श्वेतादिभ्यः इदं न मम। ॐ क्षुत्
पिपासात्स्मा मेशुद्ध्यंतां ज्योतिरहं विरज्या विपाप्मा भूयासं स्वाहा ९ क्षुत्पिपासाभ्य इदं न मम। ॐ का
मक्रोधलोभमोहहिंसा मेशुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा १० कामक्रोधादिभ्य इदं न
मम। ॐ धनधान्यात्मजसकीर्त्यपवित्री यशांसि मेशुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ११
धनादिभ्यः इदं न मम। ॐ अन्नमयप्राणमयमनोमयविज्ञानमयआनंदमयपंचकोशात्मकानि जीवशरीराणि राम
मेशुद्ध्यंतां ज्योतिरहं विरजा विपाप्मा भूयासः स्वाहा १२ अ[illegible]दिभ्यः इदं न मम। ॐ मनसावाचाकर्मणाशुभा १८

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

शुभं यत्कृतं मया तन्मे शुद्धं तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा १३ मनसा वाचा वादिभ्यः इदं न मम । ॐ
सर्वेभ्यो विश्वेभ्यो देवेभ्यः स्वाहा १४ ॐ इंद्राय स्वाहा । इदं इंद्राय १५ ॐ रुद्राय स्वाहा । इदं रुद्राय १६ ॐ ब्रह्मणे
स्वाहा । इदं ब्रह्मणे १७ ॐ विष्णवे स्वाहा । इदं विष्णवे १८ ॐ सोमाय स्वाहा । इदं सोमाय १९ ॐ ऋग्वेद विधानाय
स्वाहा २० ॐ यजुर्वेद विधानाय स्वाहा २१ ॐ सामवेद विधानाय स्वाहा २२ अथर्वण वेद विधानाय स्वाहा २३ ॐ
देह देहि छेदा घर्पित नारायण प्रीत्यर्थं होमं कर्तव्यं मे शुद्धं तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा
२४ मुख्यात्मप्राण पंचाहुतिं हुत्वा मे शुद्धं तां ज्योतिरहं विरजा विपाप्मा भूयासꣳ स्वाहा २५ ॐ क्षुत्तृष्णा सुख
दुःख मानापमान निद्रालस्य षडूर्म्यादि रहितेभ्यः स्वाहा २६ [illegible] ॐ नमो नारायणायेति मंत्रेण मूले नाष्टो
त्तरशताहुतिं हुत्वा वौषट् तेन पूर्णाहुतिं कुर्यात् भूम्या मुदकं दद्यात् इति विरजा होम विधिः अथ मृतदेहं
सर्वकर्मरहितं ध्यात्वा विष्णुस्वरूपेभ्यः संन्यासं करोमि । सार्थ येन्द्र । आदित्य चंद्रावनलो निलश्च द्यौर्भूमिरापो

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स॰न्या॰ हृदयं मनश्च । अहश्च रात्रिश्च उभे च संध्ये धर्मो हि जानाति नरस्य वृत्तं आदित्यं रुद्रादीन्सर्वान्देवान् कर्मसा
१९ क्षिणो निखिलान् गुर्वादीन्ब्राह्मणान्संन्यासस्साक्षित्वेन ध्यायेत् ततो नाभिप्रमाणं जलं प्रविश्य प्राङ्मुखः स
न् सावित्रीं प्रविशामीति संकल्प्य । ॐ भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यं ॐ भुवः सावित्रीं प्रविशामि । भर्गो देव
स्य धीमहि ॐ स्वः सावित्रीं प्रविशामि धियो यो नः प्रचोदयात् ॐ भूर्भुवः स्वः सावित्रीं प्रविशामि सर्वां गायत्रीं जपेत् ॐ परो
रजसे सावदोम् इति जपित्वा तस्य प्रणवमयमात्मानं ध्यात्वा जले स्थितः ॐ तरत्स मन्दीति तरत्समन्दी धावति धारा सु
तस्यांधसः ॥ तरत्समन्दी धावति ॥ उस्रा वेद वसूनां मर्तस्य देव्यवसः तरत्स० ॥ ध्वस्रयोः पुरुषंत्योरा सहस्राणि दद्महे ॥
तरत्समं० ॥ आ ययोस्त्रिंशतं तना सहस्राणि च दद्महे । तरत्समं० ॥ चतुर्वारं जपित्वा । आदित्यमुपतिष्ठेत् पुत्रेषणायाश्च
वित्तैषणायाश्च लोकैषणायाश्च व्युत्थितोऽहं भिक्षाचर्यं चरामीति प्रोक्त्वा पाणिनाप्सु अपो हुत्वा प्रैषोच्चारं कुर्या राम
त् तद्दक्षं वह ऊर्ध्वपरिक्षिप्य प्राङ्मुखस्तिष्ठन् ऊर्ध्वबाहुर्भूयात् ॐ भूः संन्यस्तं मया । ॐ भुवः संन्यस्तं मया । ॐ स्वः संन्यस्तं १९

RajGuru Math, Shivala, Varanasi Collection

त्रिरवामानां त्रिरवाछेदनं कृत्वा यदुंडेश्रं ... मन्त्रेण ... अमुना ... प्रथम भावेन यज्ञोपवीतं तोय
वीनद्वारणामेन

CC-0. In Public Domain. Digitization by eGangotri ... Sarasvati ... Funding IKS-MoE ...

मया। ॐ भूर्भुवः स्वः संन्यस्तं मया। इति त्रिर्मंद्रमध्यमोत्तमस्वरेणोक्त्वा। ॐ अभयं सर्वभूतेभ्यो मत्तः स्वाहा। इति मं
त्र्यां दिक्षु। अपां पूर्णांजलिं क्षिपेत्। ततः शिखार्थं स्थापितकेशानुत्पाट्य यज्ञोपवीतमप्सु न्यस्य हस्ते गृहीत्वा।
वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति
सर्वे। इति मंत्रेण समर्पयेत्। कीलत्यक्केशान् यज्ञोपवीतं च प्रक्षाल्य ॐ आपो वै सर्वा देवताः सर्वाभ्यो देवताभ्यो जु
होमि स्वाहा। ॐ भूः स्वाहा। इत्यप्सु जलैः सह जुहुयात्। आरुण्युपनिषदि च। उपवीतं भूमौ वाप्सु वा विसृजेत्। इति
तथा शिखार्थं रक्षितान् केशान् उत्पाट्य भूः स्वाहेति भूमौ अप्सु वा निक्षिपेत्। ततो विष्णुप्रार्थनाप्रकारमाह यमः।
दत्त्वा तोयांजलिं विप्रो भक्त्या संप्रार्थयेद्धरिं सर्वदेवात्मकं तोयेनोपाहुतिमहं करे दत्त्वा सर्वेषणां त्यक्त्वा पुष्पश्च
रणमागतः त्राहि मां सर्वलोकेश गतिर्नान्या विद्यते संन्यस्तं मे जगन्नाथ पाहि मां मधुसूदन। त्राहि मां सर्वलोके
श वासुदेव सनातन। संन्यस्तं मे जगद्योने पुण्डरीकाक्ष मोक्षद अहं सर्वाभयं दत्त्वा भूतानां परमेश्वर पुष्पश्चरणागमा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

सं०न्या० छन्दस्याहि मां पुरुषोत्तम। ततो जातांते उदङ्मुखः सन् वस्त्रं त्यक्त्वा यथाजातरूपधरो दिगंबरो भूत्वा बहिर्भूमा उदङ्मुखः
२० पंचवा सप्त वा पदानि गच्छेत् न तथा च संप्रदायविदः ततो दिगंबरो भूत्वा गच्छेत् किंचिदुदङ्मुखः जिज्ञासुश्चेत्तदा ब्रूत
क्लिष्टेत् तदनुज्ञासनात् जिज्ञासुं प्रति आचार्यो दंडवस्त्राणि प्रत्यर्पयति प्रियवचनैर्लौकिकव्यवहारार्थं लज्जानिवा
रणार्थं वा सोऽपि युगमयुक्तं लोकोपकारधर्मशिक्षार्थं दंडयुक्तं करोमीति वदेत् ततः स्वयं कौपीनं काषायवासश्च स्वी
कृत्य परिधाय आचम्य दंडप्रार्थनां कुर्यात् ॐ इन्द्रस्य वज्रोसि वार्त्रघ्नः शर्म मे भव यत्पापं तन्निवारय विष्णुहस्ते यथा च भव
क्रंभूलं शिवकरे यथा। इन्द्रहस्ते यथा वज्रं तथा दंड भवाद्य मे। इति दंडप्रार्थ्यं ॐ इन्द्रस्य वज्रोसि वार्त्रघ्नः सखा मा गो
पाय इत्यनेन मंत्रेण दंडग्रहणं कुर्यात् प्रणवेन कमंडलुं गृहीत्वा तथा चैव कूर्चः परिगृह्णीष्व अन्यत्सर्वं प्रणवेनेति
ततो यावद्गुरुसमीपगमनं तावद्विष्णुस्मरणपरो भवेत् ततो दंडकमंडलुं चक्रपुनः समित्पाणिर्गुरुसमीपं गत्वा एम
नमस्कारं कुर्यात्। विधायगरुडासनेनोपविश्य एका संपुटं कृत्वा गुरुप्रार्थनां कुर्यात् श्रीगुरो भगवन् अस्माद्द्वोरसं २०

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मुस्य । अनल्पकर्मजन्मजरामरणाद्यपारसंसारार्णवः । ध्यानेन मां तारय अमृतानाम सर्पं दृष्ट्वा पुरुष इव णाशतः यो
हि मां योगिनामीशानानन्यशरणागतास्मि मे प्रभो । निस्पृहः सर्वतः शान्तः सर्वविद्याविशारदः । ब्रह्मणोपसंस्थितः श्रम
सो गुरुरुच्यते । आप स्वभो जगन्नाथ गुरो संसारवह्निना दग्धं मां कालदष्टं च त्वामहं शरणं गतः अस्य यथ तिन्नूता
नि गहस्याभिक दाचन । महाव्रते चरिष्यामि कर्मणा मनसा गिरा । अविद्याकृष्णसर्पेण दष्टं ना ... पी ... त्वदु
कामृतपानेन संजीवय पुनर्मृतं इति गुरुं प्रार्थ्य दक्षिणं जानुं भूमौ नीत्वा पादग्रहणं कृत्वा यो ब्रह्माणं विदधा
ति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये इति मंत्रेण गुरुं भ
गवहुत्वो रस्यापतदेनं संसाराग्निनिविष्टमेनं तप्तं देहमानसं ब्रह्मज्ञानाम्बुशीतेन सिंच मां वाक्यवारिणा । न
मेस्ति बांधवः कश्चिन्मुक्त्वात्मानं परात्परं मम आत्मैव परो बंधुरूपत्वां धीः प्रष्टतो ऽतः अधीहि भगवो ब्रह्मेति रूपान्
तस्मै साधनचतुष्टयसंपन्नायाधिकारिणे ब्रह्मचारिणे गुरुर्ब्रह्मोपदिशति ततो गुरुरद्वैतसच्चिदानंददेवरूपात्मान

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

स॰न्या॰ मेवानुसंधाय जलपूर्णमशांस्वपुष्पादिभिरभ्यर्च्य हृदस्पर्शनं गणैरभिमंत्र्य तेनोदकेन प्रणवेन त्रिः पृथ्व्यां शिरसि सिंचेत
२१ तत्र शन्नो मित्र इत्यादि अथ शांतिं त्रिवारं पठित्वा ॐ शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा शन्न इन्द्रो बृह
स्पतिः शन्नो विष्णुरुरुक्रमः नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि ऋ
तं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु अवतु मां अवतु वक्तारं ॐ शांतिः शांतिः शांतिः शिरसि हस्तं
दत्वा। पुरुषसूक्तं जपेत् तस्यार्थ च वक्ष्यते परिशिष्टे अथास्य शिरसि पुरुषसूक्तेन पाणिमुपदधाति ॐ सहस्रशीर्षा
पुरुषः सहस्राक्षः सहस्रपात् स भूमिं सर्वतः स्पृत्वात्यतिष्ठद्दशांगुलम् पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम्
उतामृतत्वस्येशानो यदन्नेनातिरोहति २ एतावानस्य महिमातो ज्यायांश्च पूरुषः पादोस्य विश्वा भूतानि त्रिपाद
स्यामृतं दिवि ३ त्रिपादूर्ध्व उदैत्पुरुषः पादोस्येहाभवत्पुनः ततो विष्वं व्यक्रामत् साशनानशने अभि ४ ततो विरा राम
ड्जायत विराजो अधिपूरुषः स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ५ तस्माद्यज्ञात्सर्वहुतः संभृतं पृषदाज्यं २१

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पशूंस्तांश्चक्रे वायव्यानारण्यान्ग्राम्याश्च ये ६ तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे छंदांसि जज्ञिरे तस्मा-
द्यजुस्तस्मादजायत ७ तस्मादश्वा अजायन्त ये के चोभयादतः गावो ह जज्ञिरे तस्मात्तस्माज्जाता अजाव-
यः ८ तं यज्ञं बर्हिषि प्रोक्षन्पुरुषं जातमग्रतः तेन देवा अयजन्त साध्या ऋषयश्च ये ९ यत्पुरुषं व्यदधुः क-
तिधा व्यकल्पयन् मुखं किमस्यासीत्किं बाहू किमूरू पादा उच्येते १० ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृ-
तः ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ११ चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत श्रोत्राद्वायुश्च प्रा-
णश्च मुखादग्निरजायत १२ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत पद्भ्यां भूमिर्दिशः श्रोत्रात्त-
थालोकान् अकल्पयन् १३ यत्पुरुषेण हविषा देवा यज्ञमतन्वत वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः १४ वि
सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः देवा यद्यज्ञं तन्वाना अबध्नन्पुरुषं पशुम् १५ यज्ञेन यज्ञमयजन्त दे-
वास्तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः १६ अद्भ्यः संभृतः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

२० मा. पृथिव्यै रसाच्च विश्वकर्म्मणः समवर्त्तताग्रे तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्रे १७ वेदाह
२२ मेतम्पुरुषम्महान्तमादित्यवर्णन्तमसः परस्तात्तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय १८ प्रजा
पतिश्चरति गर्भेऽअन्तरजायमानो बहुधा विजायते तस्य योनिम्परिपश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि
विश्वा १९ यो देवेभ्यऽआतपति यो देवानाम्पुरोहितः पूर्व्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये २० रुचम्ब्रा
ह्मं जनयन्तो देवाऽअग्रे तदब्रुवन् यस्त्वैवं ब्राह्मणो विद्यात्तस्य देवाऽअसन्वशे २१ श्रीश्च ते लक्ष्मीश्च पत्न्याव
होरात्रे पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम् इष्णन्निषाणामुम्मइषाण सर्व्वलोकम्मइषाण २२ इति । ततो
दक्षिणकक्षां तेन हस्तं निक्षिप्य हृदये निधाय । मम व्रते ते हृदयन्ते दधामि मम चित्तमनु चित्तन्ते अस्तु मम वाचमेक
व्रतो जुषस्व बृहस्पतिष्ट्वा नियुनक्तु मह्यं इति दीक्षां दद्यात् ततः उदङ्मुखाय नित्यमुपवेशयमानेन हृदयप्रदेश णम
प्रतिपादकं प्रणवं दक्षिणकर्णे आश्रुतः तनुपदिशेत् प्रणवस्यार्थं आत्मार्थप्रवचनेन बोधयेत् उपर्वोक्तान २२

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पंचमहाभूतेत्यादिना । उंपंचीकृतपंचमहाभूतानि तत्कार्यं च सर्वं विराडित्युच्यते एतत्स्थूलशरीरमात्मनः
इंद्रियैरर्थोपलब्धिर्जागरितम् तदुभयाभिमान्यात्मा विश्वः एतत्त्रयमकारः अपंचीकृतपंचमहाभूतानि तत्का
र्यं च सप्तदशकं लिंगं भौतिकं हिरण्यगर्भ इत्युच्यते एतत्सूक्ष्मशरीरमात्मनः करणेषूपसंहृतेषु जागरितसंस्का
रजः प्रत्ययः सविषयः स्वप्नः तदुभयाभिमान्यात्मा तैजसः एतत्त्रयमुकारः शरीरद्वयकारणमात्माज्ञानम् सा
भासमव्याकृतमित्युच्यते एतत्कारणशरीरमात्मनः तच्च न सन्नासन्नापि सदसन्न भिन्नं नापि भिन्नाभिन्नं
कुतश्चिन्न निरवयवं न सावयवं नोभयं किंतु केवलब्रह्मात्मैकत्वज्ञानापनोद्यम् सर्वप्रकारज्ञानानामुपसं
हारो बुद्धेः कारणात्मनावस्थानं सुषुप्तिः तदुभयाभिमान्यात्मा प्राज्ञः एतत्त्रयं मकारः अकार उकारे उकारो
मकारे मकारश्चिदात्मन्यहमेवात्मा साक्षी केवलश्चिन्मात्रस्वरूपः नाज्ञानं तत्कार्यं च । किंतु नित्यशुद्धबुद्ध
मुक्तसत्यपरमानंदाद्वयम् ब्रह्मैवाहमस्मि अहं ब्रह्मास्मीत्यभेदेनावस्थानं समाधिः अयमात्मा ब्रह्म इत्यादि

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

 श्रुतिभ्यः ततः अयमात्मा ब्रह्म तत्त्वमसि। अहं ब्रह्मास्मि प्रज्ञानं ब्रह्मेत्यादीनि शिष्यं शाखावाक्योपदेशपूर्व
 कमुपदिशति। एषामर्थं च बोधयेत् ततो नाम दद्यात् बह्वृचः परिशिष्टे अथास्मै नाम दद्यात् वै स्वनमासना
मापवायच्छेदेति। तत्र तीर्थाश्रमसंप्रदाये। आनंदब्रह्म अद्वैतब्रह्मेत्यादि। वनारण्ये। आनंदः अद्वयानंदः
पूर्णानंदादि। गिरिपर्वतसागरेषु। चैतन्यं राघवचैतन्यं केशवचैतन्यादि। सरस्वतीभारतीपुरीषु वासुदेवस्वरूप
नारायणस्वरूपेत्यादीनि नामानि कुर्यात् ततो गुरुः शिष्यं प्रत्याह। अद्य प्रभृति त्वया संन्यासाधिकारिणः संन्या
सो देयः तथाधीतस्य दीक्षा व्याख्या च देया योगपट्टादि चेति तथा गुरून् ज्येष्ठयतीन् सदा वंदनमस्कुर्यादित्या
दि संन्यासिने गुरुणा आज्ञां कृत्वा शिष्येण शिरसा तां मान्यां प्रतिगृह्य ततो गुरुः कटिसूत्रं दत्वा यथा संप्रदायं शि
ष्यं नमस्कुर्यात् अन्येपि प्रणवो गृहस्थाश्च नमस्कुर्वंति शिष्यो नारायणेत्युक्त्वा तदासनादुत्थाय पश्चात्सनेऽपवे
श्यपित्वा शिष्यो यथोपदेशं जोटिका पादग्रहणादि नमस्कारान् गुरोरन्येषां यतीनां च कुर्यादिति। तत्र संप्रदाय

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

विः। अधीतविद्यान्सम्यांश्च दद्याद्योगपट्टं गुरुः। पादौ मृदा त्रिः प्रक्षाल्य पादुकाभ्यां गृहं व्रजेत्। द्विगुणांक
द्विसूत्रं च वध्वा बालो व गुंमच। उद्वासनं प्रकल्प्याथ विशेन्नान्तःथा गुरोः सम्यादिष्टमुपन्यस्य स्वर्वेदांते किंचि
द्वे वनु। गुरुणा विधिवन्न्यासपूर्वं शंखाभिषेचनं वा सोमाल्यादिकं कृत्वा गुरुणा यतिभिः [illegible] सहननस्क
न्यप्रपूज्याथ स्तोत्राणि च पठेन दावन्न चोपरि संधाय बंधुभिर्यतिभिः सहगीताध्यायं वि[illegible]श्वरूपं भुक्ष्व
एत्र्यां तमेव च। ततो नाम प्रकर्तव्यं गुरुणा सर्वसंमतं तीर्थाश्रमवनारण्य गिरिपर्वतसागराः सरस्वती भारती च
पुरी नामानि वै दश। श्रीपाद संज्ञा यावाच्यं नाम तस्य यथा तथं अद्यारभ्य त्वया कार्यं दीक्षा व्याख्यादिकं त
या योगपट्टो पिदातव्यः शिष्ये सम्यक् परीक्षिते इत्यात्तं गु[illegible]दत्तं गृहीत्वा शिरसा स्वयं। उत्थाय च ततः
सम्यकुर्यात्साष्टांगं हान्वितं सद्योकेन मस्कुर्यात् गुरुं ज्येष्ठयतींस्तथेति इति योगपट्टविधिः दंडः वेणवेन त्रि
दंडेन न त्रिदंडीति कथ्यते अध्यात्मदंडयुक्तोथ स त्रिदंडीति चोच्यते सप्त दंडत्यागमंत्रः एतावत्कालमस्मा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

मिश्रतो त्रिःशो निपूर्वकं विष्णुहस्तेयथा चक्रं भल्लं त्रिवकरे यथा अधुना त्वां परित्यज्य गच्छे दृष्ट्वा यथासुखं
इति शीघ्रं वर्णिक संन्यासपद्धतिः संपूर्णम् ॥ अथ यति संस्कारः ॥ शिष्य नेनं पुत्रादिः शिष्यो वा स्नात्वा
ऽधिकारसिद्ध्यर्थं वपनं कृच्छ्रचरणं कुर्यात् तत्र संकल्पः करिष्यमाण यति संस्काराधिकार सिद्ध्यर्थं कृच्छ्र
प्रत्याम्नायं प्रायश्चित्तं प्रति कृच्छ्रमेकं कृच्छ्रगोनिष्क्रयद्वारा अहमाचरिष्ये इति संकल्प्य पूर्ववत् कृत्वा वपनं कुर्यात्
पुत्रादि तिरिक्तस्य वपनं नेति केचित् देशकालौ संकीर्त्य ब्रह्मीभूतनारायणरूपिणोऽमुकशर्मणः शौनकोक्तविधिना
संस्करिष्ये इति संकल्प्य । अव्रणं नवकलशमादाय तीर्थोदकेनापूर्य तद्देशे गंगोदकं च मुने चैव ० धं कुर्यात् ना
रायणपरं ब्रह्म तत्त्वं नारायणः परः नारायण परो ध्याता ध्यानं नारायणः परः यच्च किंचित् जगत्सर्वं दृश्यते
श्रूयतेपि वा । अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः देवदत्त तथा पि श्रिहु सैव विकृति गनः पूर्णब्रह्मैव
संमोक्षः तस्य ब्रह्म त्वं त्वदुच्यते इत्येतैर्मंत्रैः कलशमभिमंत्र्य प्राणायाममपुरःसरं तैर्मंत्रैर्विष्णुसूक्तेनापोहिष्ठे

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

लितिसृभिः घृतैः स्नात्वा यथ्वा शरीरं वस्त्रवेष्टनाद्युपचारैरभ्यर्च्य शिक्ये शरीरमारोप्य गंधपुष्पैरलंकृत्य मंत्र
घोषैर्जयेत् शंखादिभिः दुंदुभिरवैरपि ग्रामात् प्राचीमुदीचीं वा दिशं नीत्वा शुद्धदेशे समाश्रयेत् नदीतीरे अश्वत्थ
मूले देवतायतने वा यथा अधस्तात् तुलसीवृक्षस्य गर्तं कुर्याद्यथाविधि ततो भूमिं व्याहृतिभिः संप्रोक्ष्य दंडमात्रम्
वेत्तो गर्तं चतुरस्रं दैर्घ्यजननात् प्रोत्खनित्वा तन्मध्ये सूक्ष्मगर्तं सार्धहस्तपरिमितं कृत्वा सप्तव्याहृतिभिः पं
चगव्येन प्रोक्ष्य तत्तले समाधिपक्षे गर्तस्थाने महानदीवापिकस्य तत्र पंचगव्यं प्रक्षिप्य दक्षिणाग्रान्कुशा
नास्तीर्य सावित्र्या शरीरं प्रोक्ष्य पुरुषसूक्तेन शंखोदकेन स्नाप्य प्रणवेनाष्टोत्तरशतवारं संस्थाप्य षोडशोप
चारैरभ्यर्च्य तुलस्यादिभिः लितपुष्पमालाभिरलंकृत्य शिक्ये हस्य ११ आसनस्थितिशरीरं गर्ते नद्यां विनिधाय ॐ
इदं विष्णुर्विचक्रमे त्रे० स्वाहेति दक्षिणहस्ते दंडं त्रेधा कृत्वा निधाय ॐ हंसः शुचिषद् स्मृ० हृदयं
परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति वेदान्तविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

पुरुषसत्वाः ते ब्रह्मलोके तु परांतकाले परामृतात्परिमुच्यंति सर्वे॰ इति हृदये जपेत्॰ गुह्य सत्यं ब्रह्मोमध्ये ज्ञे
त् अस्य जन्मानं च॰ विव॰ इति मूर्ध्नि जपेत्॰ विष्णोरराटमसि विष्णोः पृष्ठमसि विष्णोः श्नप्त्रे स्थो विष्णोः स्यू
रसि विष्णोर्ध्रुवमसि वैष्णवमसि विष्णवे त्वा॰ इति नाभौ जपेत्॰ देवस्य त्वेति कंठे योः ओं भूमिर्भूमिमगान्माता
मातरमप्यगात्॰ भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति मंत्रेण मूर्धानमङ्गुष्ठनामिकाभ्यां [illegible] रि
केले न दिभिघात शिरो भेदनं कर्तुमशक्तश्चेत् स्वस्तिकं शिरसि गुडपिंडमन्यद्वा फलं नारिकेलादिनिधाय भिंद्यादित्या
चारः इत्थं छाया प्रमाणेन देवयजनं लवणं सिकतादिवा पूरयेत् नद्यादौ चेच्छिरो भेदनानंतरं भूरित्यादि नाभि
मंत्र दर्भैराच्छाद्य भूर्भुवः सुवरोमित्यभिमंत्र्य पाशेन हृदं बध्वा जले महाहृदे प्लावयेत् स्वाहांतेन नमिक्षु देहमोचये
न प्रवृश्येत सर्वे तु नैतदनुवाकं । ततो अग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा हव्यवाड्जुह्वास्यः त्वं ह्य
ग्ने अग्निना विप्रो विप्रेण संत्सता सखा सख्या समिध्यसे । तं मर्जयंत सुक्रतुं पुरोयावानमाजिषु स्वेषु क्षयेषु वा

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

ज्ञिनां यज्ञेन यज्ञमयजंत देवास्तानि धर्माणि प्रथमान्यासन् ते ह नाकं महिमानः सचंत यत्र पूर्वे साध्याः
देवाः इति चतस्रो न्नूचः ॐ चितिः स्रुक् १ पृथिवी होता २ अग्निर्होता ३ सूर्ये तच्चक्षुः ४ महाहविर्होता
इति पंचानुवाकाः अतो देवा अवंतु न इति षड्चो जपित्वा जन्मादिकं भावितपापैर्मुक्ता वयं अभ्य[illegible]
फलं मास्ता इति भावयंतो नमस्कृत्या [illegible] बुध्या स्नात्वा गंधादि पत्वा नैवेद्यशेषं गृहीत्वा आग[illegible]
इधिको त्सवा गच्छेयुः उच्चैः हरिस्मरणपूर्वकं पुत्रश्चेत्स्य केतुनेत्यनुवाकं गतस्य हृदयस्पर्श [illegible]
दैकभर्येण [illegible] अग्निनाग्निरित्यादीनि इति विशेषः इति श्री मत्पर[illegible] [illegible]
न्नाय ॐ सोहं हंसः परमहंसं तत्वमसी पूर्वाम्नाय ॐ प्रत्याहमस्मि ॐ अहं ब्रह्मास्मि [illegible] म्नाय [illegible] हंसः तत्व
अहं ब्रह्मास्मि दक्षिणाम्नाय ॐ अहं तत्वमसि सोहं परमहंसः [illegible] विरचिता [illegible] ॥ समा
॥छ॥ ॥छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

यमलपूर्द्धटिके श्री

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math, Shivala, Varanasi Collection

CC-0. In Public Domain. Digitization by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2

RajGuru Math - Shivala, Varanasi Collection